# संजीव रिफ्रेशर

# संस्कृत

## ( कक्षा-९ )

**[ नई राष्ट्रीय शिक्षा नीति 2020 के तहत CBSE द्वारा जारी नवीनतम पाठ्यक्रम एवं NCERT द्वारा जारी नवीनतम पाठ्यपुस्तकों पर आधारित ]**

### मुख्य विशेषताएँ

- CBSE द्वारा जारी नवीनतम पाठ्यक्रम पर आधारित
- पाठ्यक्रमानुसार सभी प्रकार के प्रश्नों का समावेश
- अपठित-अवबोधनम्
- रचनात्मकं-कार्यम्
- अनुप्रयुक्त-व्याकरणम्
- पठित-अवबोधनम्
- पाठ्यपुस्तक 'शेमुषी' का सम्पूर्ण हल
- पाठ्यपुस्तक 'व्याकरणवीथिः' के निर्धारित अभ्यास-प्रश्नों का सम्पूर्ण हल
- पाठ्यपुस्तक 'अभ्यासवान् भव' के सभी अभ्यास प्रश्नों का सम्पूर्ण हल
- पाठ्यक्रमानुसार अन्य महत्त्वपूर्ण प्रश्न

**प्रकाशक :**

**संजीव प्रकाशन**

**जयपुर**

मूल्य : ₹ 250.00

प्रकाशक :
**संजीव प्रकाशन**
धामाणी मार्केट, चौड़ा रास्ता,
जयपुर-3
email : sanjeevprakashanjaipur@gmail.com
website : www.sanjivprakashan.com

© प्रकाशकाधीन

लेजर टाइपसैटिंग :
**संजीव प्रकाशन (D.T.P. Department),** जयपुर
★ ★ ★ ★ ★

❖ इस पुस्तक में त्रुटियों को दूर करने के लिए हर संभव प्रयास किया गया है। किसी भी त्रुटि के पाये जाने पर अथवा किसी भी तरह के सुझाव के लिए आप हमें निम्न पते पर email या पत्र भेजकर सूचित कर सकते हैं—
email : sanjeevprakashanjaipur@gmail.com
पता : प्रकाशन विभाग
संजीव प्रकाशन
धामाणी मार्केट, चौड़ा रास्ता, जयपुर
आपके द्वारा भेजे गये सुझावों से अगला संस्करण और बेहतर हो सकेगा।
❖ इस पुस्तक में प्रकाशित किसी त्रुटि के प्रति तथा इससे होने वाली किसी भी क्षति के लिए लेखक, प्रकाशक, संपादक तथा मुद्रक किसी भी रूप में जिम्मेदार नहीं हैं।
❖ सभी प्रकार के विवादों का न्यायिक क्षेत्र 'जयपुर' होगा।

**CBSE द्वारा जारी**

# पाठ्यक्रम ( 2024–25 )

## संस्कृतम् ( कोड नं. 122 )

## कक्षा—नवमी

आहत्य–अङ्काः–80+20
आहत्य–कालांशाः–200

वार्षिकमूल्यांकनाय निर्मिते प्रश्नपत्रे चत्वारः खण्डाः भविष्यन्ति–

| | | |
|---|---|---|
| 'क' खण्डः अपठितावबोधनम् | 10 अङ्काः | 25 कालांशाः |
| 'ख' खण्डः रचनात्मककार्यम् | 15 अङ्काः | 40 कालांशाः |
| 'ग' खण्डः अनुप्रयुक्तव्याकरणम् | 25 अङ्काः | 55 कालांशाः |
| 'घ' खण्डः पठितावबोधनम् | 30 अङ्काः | 80 कालांशाः |

**खण्डानुसारं विषयाः मूल्यभारः च**

| क्र. सं. | विषयाः | प्रश्नप्रकाराः | मूल्यभारः |
|---|---|---|---|
| | **'क' खण्ड** **अपठितावबोधनम् 10 अङ्काः** | | |
| 1. | एकः गद्यांशः (80–100 शब्दपरिमितः) | अति–लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>शीर्षकम् (लघूत्तरात्मकः)<br>भाषिककार्यम् (बहुविकल्पात्मकाः) | 1×2=2<br>2×2=4<br>1×1=1<br>1×3=3 |
| | | **पूर्णभारः** | **10 अङ्काः** |
| | **'ख' खण्डः** **रचनात्मककार्यम् 15 अङ्काः** | | |
| 2. | औपचारिकं अथवा अनौपचारिकं पत्रम् (पूर्णं पत्रं लेखनीयम्) | निबन्धात्मकः | 5 |
| 3. | चित्रवर्णनम् अथवा अनुच्छेदलेखनम् | पूर्णवाक्यात्मकाः/निबन्धात्मकः | 1×5=5 |
| 4. | हिन्दी/आङ्ग्लभाषातः संस्कृतेन अनुवादः | पूर्णवाक्यात्मकः | 1×5=5 |
| | | **पूर्णभारः** | **15 अङ्काः** |
| | **'ग' खण्डः** **अनुप्रयुक्त-व्याकरणम् 25 अङ्काः** | | |
| 5. | सन्धिः | लघूत्तरात्मकाः | 1×4=4 |
| 6. | शब्दरूपाणि | बहुविकल्पात्मकाः | 1×4=4 |
| 7. | धातुरूपाणि | बहुविकल्पात्मकाः | 1×4=4 |

| | | | |
|---|---|---|---|
| 8. | कारक-उपपदविभक्तय: | बहुविकल्पात्मका: | 1×4=4 |
| 9. | प्रत्यया: | बहुविकल्पात्मका: | 1×3=3 |
| 10. | सङ्ख्या: | लघूत्तरात्मका: | $^1/_2$×4=2 |
| 11. | उपसर्गा: | लघूत्तरात्मका: | $^1/_2$×4=2 |
| 12. | अव्ययानि | बहुविकल्पात्मकौ: | 1×2=2 |
| | | **पूर्णभार:** | **25 अङ्का:** |
| | **'घ' खण्ड:**<br>**पठितावबोधनम् 30 अङ्का:** | | |
| 13. | गद्यांश: | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>लघूत्तरात्मकौ (भाषिककार्यम्) | $^1/_2$×2=1<br>1×2=2<br>1×2=2 |
| 14. | पद्यांश: | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>लघूत्तरात्मकौ (भाषिककार्यम्) | $^1/_2$×2=1<br>1×2=2<br>1×2=2 |
| 15. | नाट्यांश: | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>लघूत्तरात्मकौ (भाषिककार्यम्) | $^1/_2$×2=1<br>1×2=2<br>1×2=2 |
| 16. | प्रश्न निर्माणम् | पूर्णवाक्यात्मका: | 1×4=4 |
| 17. | अन्वय: अथवा भावार्थ: | निबन्धात्मक: | 3 |
| 18. | घटनाक्रमानुसारं वाक्यलेखनम् | निबन्धात्मक: | $^1/_2$×8=4 |
| 19. | (क) प्रसङ्गानुसारम् अर्थस्य लेखनम्<br>(ख) शब्दानाम् अर्थै: सह मेलनम् | लघूत्तरात्मका:<br>लघूत्तरात्मका: | $^1/_2$×4=2<br>$^1/_2$×4=2 |
| | | **पूर्णभार:** | **30 अङ्का:** |

**सम्पूर्णभार: 80 अङ्का:**

## प्रश्नपत्र-प्रारूपम्/संरचना

## कक्षा–नवमी (2024-25)

### संस्कृतम् (कोड सङ्ख्या-122)

| **प्रश्नप्रकार:** | **प्रश्नानां सङ्ख्या** | **विभाग-सङ्ख्या** | **प्रतिप्रश्नम् अङ्कभार:** | **आहत्याङ्का:** |
|---|---|---|---|---|
| **अति-लघूत्तरात्मका: $^1/_2$ अङ्क:** | 2+2+2=6 | 3 | $^1/_2$ | 3 |
| **अति-लघूत्तरात्मका: 1 अङ्क:** | 2=2 | 1 | 1 | 2 |
| **बहुविकल्पात्मका: 1 अङ्क:** | 3+4+4+4+3=18 | 5 | 1 | 18 |

| | | | | | |
|---|---|---|---|---|---|
| **लघूत्तरात्मकाः** | **$^1/_2$ अङ्कः** | 4+4+4+4+4=20 | 5 | $^1/_2$ | 10 |
| **लघूत्तरात्मकाः** | **1 अङ्कः** | 2+2+2+1+4=11 | 5 | 1 | 11 |
| **दीर्घोत्तरात्मकाः** | **$^1/_2$ अङ्कः** | 8=8 | 1 | $^1/_2$ | 4 |
| **दीर्घोत्तरात्मकाः** | **1 अङ्कः** | 5+5+2+2+2+4=20 | 6 | 1 | 20 |
| **दीर्घोत्तरात्मकाः** | **2 अङ्कौः** | 2=2 | 1 | 2 | 4 |
| **निबन्धात्मकाः** | **3 अङ्काः** | 1=1 | 1 | 3 | 3 |
| **निबन्धात्मकाः** | **5 अङ्काः** | 1=1 | 1 | 5 | 5 |
| | | | | **आहत्याङ्काः** | **80** |

# संस्कृतपाठ्यक्रमः ( कोड नं. 122 )

## कक्षा–नवमी ( 2024-25 )

### वार्षिकं मूल्याङ्कनम्

| | |
|---|---|
| **'क' खण्डः**<br>**अपठितावबोधनम्** | **( 10 अङ्काः )** |
| 1. एकः अपठितः गद्यांशः<br>80-100 शब्दपरिमितः गद्यांशः, सरलकथा, वर्णनं वा<br>• एकपदेन पूर्णवाक्येन च अवबोधनात्मकं कार्यम् (2+4)<br>• शीर्षकलेखनम् (1)<br>• अनुच्छेद-आधारितम् भाषिकं कार्यम् (3)<br>भाषिककार्याय तत्त्वानि–<br>• वाक्ये कर्तृ-क्रियापदचयनम्<br>• कर्तृ-क्रिया-अन्वितिः<br>• विशेषण-विशेष्यचयनम्<br>• पर्याय-विलोमपदचयनम्<br>• सर्वनामस्थाने संज्ञाप्रयोगः | 10 |
| **'ख' खण्डः**<br>**रचनात्मककार्यम्** | **( 15 अङ्काः )** |
| 2. औपचारिकम् अथवा अनौपचारिकं पूर्णपत्रलेखनम्<br>सम्भावितविषयाः–<br>• औपचारिकम्–<br>अवकाशार्थम्, स्वच्छतायै स्वास्थ्यविभागाय, विद्युद्विभागाय, वित्तकोषाय, आरक्षकालयाय, प्रकाशकाय इत्यादयः। | 5 |

| | |
|---|---|
| • अनौपचारिकम्–<br>पित्राभ्याम्, वर्धापनपत्रम्, निमन्त्रणपत्रम्, परिणामसूचनापत्रम् इत्यादय। | |
| 3. चित्राधारितम् वर्णनम् अथवा अनुच्छेदलेखनम्<br>(मञ्जूषायाः सहायतया चित्रवर्णनम् अनुच्छेदलेखनं वा करणीयम्) | 5 |
| 4. हिन्दीभाषायाम् आङ्ग्लभाषायां वा लिखितानां पञ्चवाक्यानां संस्कृतभाषायाम् अनुवादः | 5 |
| **'ग' खण्डः**<br>**अनुप्रयुक्तव्याकरणम्** **(25 अङ्काः)** | |
| 5. सन्धिकार्यम्<br>• स्वरसन्धिः – दीर्घः, गुण, वृद्धिः, यण्, अयादि<br>• व्यञ्जनसन्धिः– जश्त्वसन्धिः, 'म्' स्थाने अनुस्वारः<br>• विसर्गसन्धिः – उत्वम्, रत्वम् | 4 |
| 6. शब्दरूपाणि<br>• अकारान्तपुँल्लिङ्गशब्दाः – बालकवत्<br>• इकारान्तपुँल्लिङ्गशब्दाः – कविवत्<br>• उकारान्तपुँल्लिङ्गशब्दाः – साधुवत्<br>• ऋकारान्तपुँल्लिङ्गशब्दाः – पितृवत्<br>• आकारान्तस्त्रीलिङ्गशब्दाः– लतावत्<br>• ईकारान्तस्त्रीलिङ्गशब्दाः– नदीवत्<br>• ऋकारान्तस्त्रीलिङ्गशब्दाः– मातृवत्<br>• हलन्ताः–राजन्, भवत्, विद्वस्, गुणिन्<br>• सर्वनामशब्दाः–अस्मद्, युष्मद्, तत्, इदम्, किम् (त्रिषु लिङ्गेषु) | 4 |
| 7. धातुरूपाणि<br>• पठ्, गम्, वद्, भू, क्रीड्, नी, दृश्, शक्, ज्ञा, अस्, कृ, दा, क्री, श्रु, पा (पिब्), सेव्, लभ् (पञ्चसु लकारेषु) | 4 |
| 8. कारक–उपपद–विभक्तयः<br>• द्वितीया – उभयतः, धिक्, परितः, समया, निकषा, प्रति, विना<br>• तृतीया – सह, साकम्, समम्, सार्धम्, विना, अलमृ, सदृश, हीन<br>• चतुर्थी–रुच्, दा (यच्छ्), नमः, कुप्, स्वस्ति<br>• पञ्चमी – विना, बहिः, भी, रक्ष्, ऋते<br>• षष्ठी – उपरि, अधः, पुरतः, पृष्ठतः, निर्धारणे<br>• सप्तमी – स्निह, निपुणः, विश्वस्, पटु। | 4 |
| 9. प्रत्ययाः<br>• क्त्वा क्त्वा, तुमुन्, ल्यप्, क्तवतु, शतृ, शानच्, क्त | 3 |

| | |
|---|---|
| 10. सङ्ख्या– 1–100 (1–4 केवलं प्रथमा-विभक्तौ) | 2 |
| 11. उपसर्गाः (द्वाविंशतिः) | 2 |
| 12. अव्ययानि<br>• स्थानबोधकानि–अत्र, तत्र, अन्यत्र, सर्वत्र, यत्र, एकत्र, उभयत्र<br>• कालबोधकानि – यदा, तदा, सर्वदा, एकदा,, पुरा, अधुना, अद्य, श्वः, ह्यः<br>• प्रश्नबोधकानि – किम्, कुत्र, कति, कदा, कुतः, कथम्, किमर्थम्<br>• अन्यानि – च, अपि, यदि, तर्हि, यथा, तथा, सम्यक्, एव | 2 |
| **'घ' खण्डः**<br>**पठितावबोधनम्** | **(30 अङ्काः)** |
| 13. गद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि<br>भाषिककार्यम्–<br>• वाक्ये कर्तृ-क्रियापदचयनम्<br>• विशेषण-विशेष्यचयनम्<br>• पर्याय-विलोमपचयनम् | 5 |
| 14. पद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्<br>प्रश्नप्रकाराः– एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि<br>भाषिककार्यम्–<br>• वाक्ये कर्तृ-क्रियापदचयनम्<br>• विशेषण-विशेष्यचयनम्<br>• पर्याय-विलोमपचयनम् | 5 |
| 15. नाट्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्<br>प्रश्नप्रकाराः– एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि<br>भाषिककार्यम्–<br>• वाक्ये कर्तृ-क्रियापदचयनम्<br>• विशेषण-विशेष्यचयनम्<br>• पर्याय-विलोमपचयनम् | 5 |
| 16. वाक्येषु रेखांङ्कितपदानि अधिकृत्य उचितप्रश्ननिर्माणम् | 4 |
| 17. श्लोकान्वयः/एकस्य श्लोकस्य संस्कृतेन भावार्थलेखनम् | 3 |
| 18. घटनाक्रमानुसारं कथालेखनम् | 4 |
| 19. (क) प्रसङ्गानुसारम् अर्थलेखनम् | 2 |
| (ख) शब्दानाम् अर्थैः सह मेलनम्<br>(पाठान् आधृत्य लघूत्तरात्मकाः प्रश्नाः) | 2 |

**आहत्याङ्काः– 80**

**परीक्षायै निर्धारिताः पाठाः**

| **पाठ सङ्ख्या** | **पाठनाम** |
|---|---|
| प्रथमः पाठः | भारतीवसन्तगीतिः |
| द्वितीयः पाठः | स्वर्णकाकः |
| तृतीयः पाठः | गोदोहनम् |
| पञ्चमः पाठः | सूक्तिमौक्तिकम् |
| षष्ठः पाठः | भ्रान्तो बालः |
| नवमः पाठः | सिकतासेतुः |
| दशमः पाठः | जटायोः शौर्यम् |
| एकादशः पाठः | पर्यावरणम् |
| द्वादशः पाठः | वाङ्मनःप्राणस्वरूपम् |

**निर्धारित-पाठ्यपुस्तकानि–**

1. 'शेमुषी' प्रथमो भागः, पाठ्यपुस्तकम्, संशोधितसंस्करणम्
   (प्रकाशनम्–रा. शै. अनु. प्र. परि. द्वारा)
2. 'अभ्यासवान् भव'–प्रथमो भागः–व्याकरणपुस्तकम्
   (प्रकाशनम्– रा. शै. अनु. प्र. परि. द्वारा)
3. 'व्याकरणवीथिः' –व्याकरणपुस्तकम्
   (प्रकाशनम्– रा. शै. अनु. प्र. परि. द्वारा)

**अवधेयम्–**

* अनुप्रयुक्तव्याकरणस्य अंशानां चयनं यथासम्भवं 'शेमुषी-प्रथमो भागः इति' पाठ्यपुस्तकात् करणीयम्। यदि ततः न सम्भवति तर्हि 'अभ्यासवान् भव-प्रथमो भागः' इत्यस्मात् कर्तुं शक्यम्।

# विषयानुक्रमणिका


## 'क' खण्डः–अपठित-अवबोधनम्

80–100 शब्दपरिमितः एकः गद्यांशः 1–28

## 'ख' खण्डः–रचनात्मकं कार्यम्

(i) औपचारिकं अथवा अनौपचारिकं पत्रम् 29–60

(ii) चित्राधारितं अथवा अनुच्छेदलेखनम् 60–94
(क) चित्राधारितं–वर्णनम् 61–87
(ख) अनुच्छेदलेखनम् 87–94

(iii) अनुवाद–कार्यम् 94–110

## 'ग' खण्डः–अनुप्रयुक्त-व्याकरणम्

1. सन्धिकार्यम् 111–128
2. शब्द–रूपाणि 129–149
3. धातुरूपाणि 149–185
4. कारकम्–उपपद–विभक्तयः 185–203
5. प्रत्ययज्ञानम् 203–223
6. संख्याज्ञानम्–(1–100) 223–233
7. उपसर्गाः 233–242
8. अव्ययपदानि 242–255

## 'घ' खण्डः–पठित-अवबोधनम्

## शेमुषी ( प्रथमो भागः )

मङ्गलम् 256

| | | |
|---|---|---|
| 1. | भारतीवसन्तगीतिः | 257–267 |
| 2. | स्वर्णकाकः | 268–283 |
| 3. | गोदोहनम् | 284–301 |
| 4. | सूक्तिमौक्तिकम् | 302–316 |
| 5. | भ्रान्तो बालः | 317–329 |
| 6. | लौहतुला | 330–342 |
| 7. | सिकतासेतुः | 343–356 |
| 8. | जटायोः शौर्यम् | 357–372 |
| 9. | पर्यावरणम् | 373–384 |
| 10. | वाङ्मनः प्राणस्वरूपम् | 385–395 |

# संस्कृत–कक्षा–9

## 'क' खण्डः

# अपठित-अवबोधनम्

## 80-100 शब्दपरिमितः एकः गद्यांशः

**ध्यातव्य**–नवीन पाठ्यक्रम में विद्यार्थियों को संस्कृत-भाषा के अर्थावबोधन एवं बुद्धि-कौशल परीक्षण की दृष्टि से अपठित-अवबोधन के अन्तर्गत 80-100 शब्दों तक के गद्यांश निर्धारित हैं। इसके लिए 10 अंक निर्धारित हैं।

(i) ये गद्यांश किसी सरल कथा अथवा किसी विषय के वर्णन से सम्बन्धित होते हैं। इन गद्यांशों के नीचे सम्बन्धित प्रश्न दिये हुए होते हैं, जिनका उत्तर गद्यांश को ध्यानपूर्वक पढ़कर संस्कृत-भाषा में ही देना होता है।

(ii) दिये गये गद्यांश पर निम्नलिखित प्रकार के प्रश्न पूछे जाते हैं—

**( अ ) अवबोधनात्मक कार्य**–इसके अन्तर्गत एक पद में उत्तर तथा पूर्ण वाक्य में उत्तर वाले प्रश्न पूछे जाते हैं। शीर्षक-लेखन से सम्बन्धित एक प्रश्न पूछा जाता है।

**( ब ) भाषिक कार्य**–इनमें वाक्य में कर्त्ता-क्रिया पद का चयन, कर्त्ता-क्रिया का अन्वय, विशेषण-विशेष्य चयन, पर्याय तथा विलोम पदों के चयन से सम्बन्धित प्रश्न पूछे जाते हैं। इनका उत्तर सम्बन्धित गद्यांश/अनुच्छेद के आधार पर देना चाहिए।

(iii) यहाँ एन.सी.ई.आर.टी. द्वारा निर्धारित पाठ्यपुस्तक 'व्याकरणवीथिः' तथा 'अभ्यासवान् भव' में दिए गये अपठित गद्यांश एवं अभ्यास प्रश्नों को हल सहित दिया गया है। साथ ही विगत वर्षों की परीक्षाओं में पूछे गये तथा परीक्षा की दृष्टि से महत्त्वपूर्ण अन्य अपठित गद्यांश/अनुच्छेद देकर अवबोधन-कार्य का अभ्यास कराया जा रहा है।

## व्याकरणवीथिः के अपठित-गद्यांश

**निर्देशः–अधोलिखितम् अनुच्छेदं/गद्यांशं पठित्वा प्रश्नान् उत्तरत्–**

( 1 )

**उत्साहः उदासीनता, निराशा चेति तिस्रः मनसः अवस्थाः। शिशवः सदा उत्साहशीलाः इति विदितमेव। युवानः अपि प्रायेण उत्साहशीलाः। अनेके वृद्धाः अपि तथैव। वयसः उत्साहस्य च नास्ति सम्बन्धः। उत्साहः मानवस्य सहजः स्वभावः। सः मनसः शरीरस्य च विकासाय भवति। शिशुः उत्साहेन सर्वं ग्रहीतुं, सर्वैः सह खादितुं सर्वैः सह खेलितुं च प्रवर्तते। प्रतिबन्धे कृते रोदिति। उपहासे कृते क्रोधं प्रकटयति किन्तु निराशो न भवति।** ( पृष्ठ-134 )

**प्रश्नाः–I. एकपदेन उत्तरत–**

(i) शिशुः उपहासे कृते किं करोति?

(ii) मनसः कति अवस्थाः सन्ति?

**II. पूर्णवाक्येन उत्तरत–**

(i) के के उत्साहशीलाः भवन्ति?

**III. निर्देशानुसारम् उत्तरत–**

(i) 'अनेके वृद्धाः' अत्र विशेषणपदम् किम्?

(ii) 'ज्ञातमेव' इति अर्थे किं पदम् अनुच्छेदे प्रयुक्तम्?

**उत्तराणि**–I. (i) क्रोधम्। (ii) तिस्रः।

II. (i) शिशवः, युवानः, वृद्धाः च सर्वे उत्साहशीलाः भवन्ति।

III. (i) अनेके। (ii) विदितमेव।

**( 2 )**

**कस्मिंश्चित् प्रदेशे काचित् नदी प्रवहति स्म। नदीतीरे कश्चन् संन्यासी स्वशिष्यैः सह आश्रमं निर्माय वसति स्म। एकदा संन्यासी शिष्यैः सह नद्याः अपरं तीरं गन्तुम् एकां नोकाम् आरूढवान्। वेगेन प्रवहन्त्यां नद्याम् अकस्मात् एका अपरा नौका शिलायाः घट्टनेन निमग्ना अभवत्। तेन तस्यां नौकायां स्थिताः सर्वे जनाः मरणं प्राप्तवन्तः। संन्यासी अकथयत्–तस्यां नौकायां स्थितेषु कश्चित् दुष्टः आसीत् इति मन्ये। अतः ते सर्वे मरणं प्राप्तवन्तः।** **( पृष्ठ-135 )**

**प्रश्नाः–I. एकपदेन उत्तरत–**

(i) संन्यासी कुत्र वसति स्म?

(ii) अपरा नौका कस्याः घट्टनेन नद्यां निमग्ना अभवत्?

**II. पूर्णवाक्येन उत्तरत-**

(i) संन्यासी नौकादुर्घटनायाः किं कारणं कथितवान्?

**III. निर्देशानुसारम् उत्तरत–**

(i) 'सज्जनः' इति पदस्य विपरीतार्थकपदम् अनुच्छेदात् चित्वा लिखत।

(ii) 'आरूढवान्' इति क्रियायाः कर्तृपदम् अनुच्छेदात् चित्वा लिखत।

**उत्तराणि**–I. (i) नदीतीरे। (ii) शिलायाः।

II. (i) संन्यासी नौकादुर्घटनायाः कारणं कथितवान् यत्—"तस्यां नौकायां स्थितेषु कश्चित् दुष्टः आसीत्। अतः ते सर्वे मरणं प्राप्तवन्तः।"

III. (i) दुष्टः। (ii) संन्यासी।

**( 3 )**

**प्रातःकालादारभ्य सायं पर्यन्तं मानवः अनेकानि कार्याणि करोति। एतेषु कार्येषु किं समीचीनं किं वा असमीचीनम् इति विषये शयनकाले अवश्यं चिन्तनीयम्। एतादृशेन आत्मावलोकनेन स्वकीये आचरणे अज्ञानेन अनवधानेन रागद्वेषाभ्यां वा यदि कश्चन प्रमादः सञ्जातः, अपचारः द्रोहो वा निष्पन्नः तर्हि तेशां परिमार्जनोपायः अवश्यम् आलोचनीयः। पश्चात्तापः अनुभवितव्यः। श्वः प्रभृति एतादृशं प्रमादं न करिष्यामि इति दृढसङ्कल्पः करणीयः।** **( पृष्ठ-135-136 )**

**प्रश्नाः–I. एकपदेन उत्तरत–**

(i) किं समीचीनम् किं वा असमीचीनम् इति विषये कदा आलोचनीयम्?

(ii) यदि अपचारः द्रोहः वा निष्पन्नः तदा कः अवश्यम् आलोचनीयः?

**II. पूर्णवाक्येन उत्तरत–**

(i) कः दृढ़सङ्कल्पः करणीयः?

**III. निर्देशानुसारम् उत्तरत–**

(i) अनुच्छेदे के पदे परस्परं विपरीतार्थे प्रयुक्ते?

**उत्तराणि–**I. (i) शयनकाले। (ii) परिमार्जनोपायः।

II. (i) 'श्वः प्रभृति एतादृशं प्रमादं न करिष्यामि' इति दृढसङ्कल्पः करणीयः।

III. (i) प्रातःकालम्–सायम्। समीचीनम्–असमीचीनम्।

**( 4 )**

**यः स्वदोषाणां कृते अनुतपति तस्य सत्पथगमनस्य द्वारम् उद्घाटितं भवति। अनुतापानलेन पापानि भस्मीभवन्ति, ग्लानिः नश्यति, चित्तं निर्मलं प्रसन्नं च भवति, सद्विचारः समुदेति। इत्थम् आत्मानुशीलनस्य महत्त्वं जीवने अनुभूयते। तेनकृतेषु कार्येषु त्रुटयः न भवन्ति। अतः कृतदोषोऽपि जनः अनुतप्य सत्कर्मसम्पादनेन जीवने महान् भवितुम् अर्हति। ( पृष्ठ-136 )**

**प्रश्नाः–I. एकपदेन उत्तरत–**

(i) जीवने कस्य महत्त्वम् अनुभूयते?

(ii) कृतदोषः जनः केन महान् भवितुं शक्नोति?

**II. पूर्णवाक्येन उत्तरत–**

(i) अनुतापानलेन किं कि भवति?

**III. निर्देशानुसारम् उत्तरत–**

(i) 'एवम्' इति अर्थे किं पदम् अनुच्छेदे प्रयुक्तम्?

(ii) 'अनुभूयते' इति क्रियापदस्य कर्तृपदं किम्?

**उत्तराणि–**I. (i) आत्मानुशीलनस्य। (ii) सत्कर्मसम्पादनेन।

II. (i) अनुतापानलेन पापानि भस्मीभवन्ति, ग्लानिः नश्यति, चित्तं निर्मलं प्रसन्नं च भवति, सद्-विचारः समुदेति।

III. (i) इत्थम्। (ii) महत्त्वम्।

**( 5 )**

**कस्मिंश्चित् अरण्ये अनेके पशवः वसन्ति स्मः एकदा पशूनां राजा सिंहः रोगपीड़ितः अभवत्। एकं शृगालं विहाय सर्वे पशवः रोगपीडितं नृपं द्रष्टुमागताः। एकः उष्ट्र नृपाय एतत् न्यवेदयत् यत् अहंकारिणं शृगालं विहाय सर्वे भवन्तं द्रष्टुमागताः। एतच्छ्रुत्वा सिंहः क्रोधितोऽभवत्। स्वमित्रैः एतज्ज्ञात्वा शृगालः शीघ्रमेव सिंहस्य समीपे प्राप्तः। क्रोधितेन सिंहेन विलम्बेन आगमनकारणं पृष्टः शृगालोऽवदत् यदहं तु सर्वप्रथममागन्तुम् ऐच्छम् परं चिकित्सकात् औषधमपि आनेयमिति विचिन्त्य तत्रागच्छम्। तच्छ्रुत्वा प्रसन्नः सिंहः औषधविषये पृष्टवान्। शृगालः अवदत् यत्तेन औषधं तु न दत्तं परं कृपापरो भूत्वा चिकित्साक्रमम् उक्तम् यत् उष्ट्रस्य रक्तपानेनैव रोगस्य शान्तिः भविष्यति। तदा सिंहः उष्ट्रमाहूतवान्। भक्त्या आगतं च तं मारयित्वा तस्य रक्तं पीतवान्। एवं स्वपिशुनतायाः दुष्फलम् उष्ट्रेण स्वयमेव प्राप्तम्। ( पृष्ठ-136-137 )**

**प्रश्नाः–I. एकपदेन उत्तरत–**

(i) चिकित्सकेन किम् उक्तमासीत्?

(ii) शृगालः शीघ्रमेव कस्य समीपे प्राप्तः?

(iii) उष्ट्रेण कस्याः दुष्फलम् प्राप्तम्?

(iv) अनेके पशवः कुत्र वसन्ति स्म?

**II. पूर्णवाक्येन उत्तरत–**

(i) क्रोधितेन सिंहेन किं पृष्टम्?

(ii) चिकित्सकेन कीदृशं चिकित्साक्रमम् उक्तम्?

(iii) कं विहाय सर्वे सिंहं द्रष्टुमागच्छन्?

(iv) सिंहः उष्ट्रमाहूयं किं कृतवान्?

**III. निर्देशानुसारम् उत्तरत–**

(i) 'प्रसन्नः सिंहः' इति अत्र विशेष्यपदं किम्?

(ii) 'त्यक्त्वा' इत्यर्थे किं पदम् अनुच्छेदे प्रयुक्तम्?

(iii) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।

**उत्तराणि**–I. (i) चिकित्साक्रमम्। (ii) सिंहस्य।

(iii) स्वपिशुनतायाः। (iv) अरण्ये।

II. (i) क्रोधितेन सिंहेन विलम्बेन आगमनकारणं पृष्टम्।

(ii) चिकित्सकेन चिकित्साक्रमम् उक्तम् यत् उष्ट्रस्य रक्तपानेन एव रोगस्य शान्तिः भविष्यति।

(iii) श्रृगालं विहाय सर्वे सिंहम् द्रष्टुम् आगच्छन्।

(iv) सिंहः उष्ट्रम् आहूय तम् मारयित्वा तस्य रक्तं पीतवान्।

III. (i) सिंहः। (ii) विहाय।

(iii) पिशुनतायाः दुष्फलम्।

**( 6 )**

**अमर्त्यसेनः इति नाम एव संस्कृतमयम्। अमर्त्यसेनवर्यस्य जन्म शान्तिनिकेतने अभवत्। अस्य नाम गुरुदेवेन रवीन्द्रनाथवर्येण चितम्। अस्य नाम निर्दिशन् सः उक्तवान् आसीत्–"अमर्त्यसेनः" इत्येषः शब्दः संस्कृतमूलः अतः एतस्य उच्चारणं स्पष्टं स्यात्, यतः अर्थपरिवर्तनं न भवेत्। शान्तिनिकेतने वसन् अमर्त्यसेनः बाल्ये संस्कृताभ्यासं कृतवान्। तस्य तीव्रः अभिलाषः अपि आसीत् यत् मातामहः क्षितीशमोहनसेन इव अहम् अपि प्रसिद्धः संस्कृतविद्वान् भवेयम् इति।** **( पृष्ठ-137-138 )**

**प्रश्नाः–I. एकपदेन उत्तरत–**

(i) अमर्त्यसेनस्य मातामहस्य नाम किम् आसीत्?

(ii) कुत्र वसन् अमर्त्यसेनः संस्कृताभ्यासं कृतवान् आसीत्?

(iii) अमर्त्यसेनस्य नाम केन चितम्?

(iv) किं भवितुम् अमर्त्यसेनस्य तीव्रः अभिलाषः आसीत्?

**II. पूर्णवाक्येन उत्तरत-**

(i) अमर्त्यसेनस्य नामविषये निर्दिशन् रवीन्द्रनाथवर्यः किमुक्तवान्?

**III. निर्देशानुसारम् उत्तरत–**

(i) 'अस्य नाम' इत्यत्र 'अस्य' इति पदं कस्मै प्रयुक्तम्?

(ii) 'स्यात्' इत्यर्थे किं क्रियापदम् अनुच्छेदे प्रयुक्तम्?

(iii) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।

**उत्तराणि**–I. (i) क्षितीशमोहनसेनः। (ii) शान्तिनिकेतने।

(iii) रवीन्द्रनाथवर्येण। (iv) संस्कृतविद्वान्।

II. (i) अमर्त्यसेनस्य नामविषये निर्दिशन् रवीन्द्रनाथवर्यः उक्तवान् यत् एषः शब्दः संस्कृतमूलः अतः एतस्य उच्चारणं स्पष्टं स्यात्, यतः अर्थपरिवर्तनं न भवेत्।

III. (i) अमर्त्यसेनाय। (ii) भवेत्।

(iii) अमर्त्यसेनः।

( 7 )

**कदाचित् देवराजः इन्द्रः भूलोकम् आगतवान्। भूलोके कमपि नगरं प्रविष्टः सः मार्गे गच्छन् आसीत्। तत्र कश्चन विक्रेता बहूनां देवानां विग्रहान् संस्थाप्य विक्रयणं करोति स्म। देवेन्द्रः कुतूहलेन समीपं गत्वा दृष्टवान् तत्र विष्णुः, शिवः, लक्ष्मीः, सरस्वती, गणेशः इत्यादीनां देवानां विग्रहाः आसन्। देवेन्द्रस्य विग्रहः अपि तत्र आसीत्। देवेन्द्रः एकैकस्यापि विग्रहस्य मूल्यं पृष्ट्वा-पृष्ट्वा ज्ञातवान्। अन्ते च कुतूहलेन तत्र स्थितस्य देवेन्द्रविग्रहस्य मूल्यं पृष्टवान्। सः विक्रेता उक्तवान् – यः कोऽपि कमपि विग्रहं क्रीणाति तस्मै एषः देवेन्द्र-विग्रहः निःशुल्कं दीयते इति। तदा तु देवेन्द्रस्य स्थितिः शोचनीया एव आसीत्।**
**( पृष्ठ-138-139 )**

**प्रश्नाः–I. एकपदेन उत्तरत–**

(i) देवराजः कुत्र आगतवान्?
(ii) कस्य स्थितिः शोचनीया आसीत्?

**II. पूर्णवाक्येन उत्तरत–**

(i) विक्रेता तत्र केषां देवानां विग्रहान् स्थापितवान्?
(ii) देवेन्द्रविग्रहम् कस्मै निःशुल्कं दीयते?

**III. निर्देशानुसारम् उत्तरत–**

(i) 'स्थितिः शोचनीया' अत्र विशेष्यपदं किम्?
(ii) 'अपश्यत्' इत्यर्थे किं क्रियापदम् अनुच्छेदे प्रयुक्तम्?
(iii) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।

**उत्तराणि–**I. (i) भूलोकम्। (ii) देवेन्द्रस्य।
II. (i) विक्रेता तत्र विष्णुः, शिवः, लक्ष्मीः, सरस्वती, गणेशः इत्यादीनां देवानां विग्रहान् स्थापितवान्।
(ii) यः कोऽपि कमपि विग्रहं क्रीणाति तस्मै एषः देवेन्द्र-विग्रहः निःशुल्कं दीयते।
III. (i) स्थितिः। (ii) दृष्टवान्।
(iii) देवेन्द्रविग्रहस्य मूल्यम्।

( 8 )

**हरियाणाराज्ये यमुनानगरमण्डले एकः संस्कृतपरिवारः अस्ति। तस्मिन् गृहे सर्वे संस्कृते सम्भाषणं कुर्वन्ति। तत्र पशवोऽपि संस्कृतम् अवबोद्धुं समर्थाः सन्ति। तस्मिन् गृहे अभिमन्युः नाम एकः युवकः अस्ति। सोऽपि संस्कृतं वदति। एकदा तत्र एकः संस्कृतप्राध्यापकः आगतवान्। तेन सह अभिमन्युः संस्कृतेन सम्भाषणं कृतवान्। तस्य युवकस्य प्रतिभां दृष्ट्वा प्राध्यापकः अभिमन्यवे शतं रूप्यकाणि दत्तवान्। तस्मात् दिनात् तस्य मनसि संस्कृतं प्रति महती अभिरुचिः समुत्पन्ना। सः प्रतिदिनं गीतायाः श्लोकान् पठित्वा-पठित्वा सर्वान् श्लोकान् अस्मरत्।** **( पृष्ठ-139 )**

**प्रश्नाः–I. एकपदेन उत्तरत–**

(i) संस्कृतपरिवारः कुत्र अस्ति?
(ii) प्राध्यापकः कस्मै शतं रूप्यकाणि दत्तवान्?

**II. पूर्णवाक्येन उत्तरत–**

(i) प्राध्यापकः अभिमन्यवे शतं रूप्यकाणि किमर्थं दत्तवान्?
(ii) युवकः कथं गीतायाः श्लोकान् अस्मरत्?

**III. निर्देशानुसारम् उत्तरत–**

(i) 'अयच्छत्' इत्यर्थे किं क्रियापदम् अनुच्छेदे प्रयुक्तम्?